STOTRADHWANI

# गणनायकाष्टकम्

एकदन्तं महाकायं तप्त काञ्चन सन्निभम् ।
लम्बोदरं विशालाक्षं वन्देऽहं गणनायकम् ॥ १

मौञ्जी कृष्णाजिनधरं नाग यज्ञोपवीतिनम् ।
बालेन्दु सकला मौलिं वन्देऽहं गणनायकम् ॥ २

अम्बिका हृदयानन्दं मातृभिः परिवेष्टितम् ।
भक्तिप्रियं मदोन्मत्तं वन्देऽहं गणनायकम् ॥ ३

चित्र रत्न विचित्राङ्गं चित्रमाला विभूषितम् ।
चित्ररूपधरं देवं वन्देऽहं गणनायकम् ॥ ४

गज वक्त्रं सुरश्रेष्ठं कर्ण चामर भूषितम् ।
पाशाङ्कुशधरं देवं वन्देऽहं गणनायकम् ॥ ५

मूषकोत्तम मारुह्य देवासुर महाहवे
योद्धुकामं महावीर्यं वन्देऽहं गणनायकम् ॥ ६

यक्ष किन्नर गन्धर्वक्ष् सिद्ध विद्याधरै स्सदा
स्तूयमानं महाबाहुं वन्देऽहं गणनायकम् ॥ ७

सर्व विघ्न हरं देवं सर्व विघ्न विवर्जितम् ।
सर्व सिद्धि प्रदातारं वन्देऽहं गणनायकम् ॥ ८

गणाष्टक मिदं पुण्यं यः पठे सततं नरः
सिद्ध्यन्ति सर्वकार्याणि विद्यावान् धनवान् भवेत्

इति श्रीगणनायकाष्टकं सम्पूर्णम् ।